**४ – केषु गणेषु गुणः सम्भवति धात्वङ्गे ?**

एतावता अस्माभिः दृष्टं यत् भ्वादिगणे चुरादिगणे च गुणकार्यं सम्भवति यथासङ्गम् | तुदादिगणे गुणः नार्हः इत्यपि दृष्टम् | अपरेषु गणेषु का गतिः ? तेषु गुणः अर्हः चेत् किमर्थं; नार्हः चेत् किमर्थमित्यपि प्रश्नः उदेति | तत्र स्थितिः कीदृशी इति अवलोकयाम | नाम आहत्य सर्वदशगणान् मनसि निधाय किं वक्तुं शक्येत ?

१. प्रथमतया "गुणः सम्भवति न वा" इत्यनेन "धातौ गुणः सम्भवति न वा" इति अत्र आशयः | तिङन्तपदे भागत्रयं वर्तते— धातुः, विकरणप्रत्ययः, तिङ्–प्रत्ययः च | केषुचित् गणेषु विकरणप्रत्यये अपि गुणः सम्भवति (शक्नु → शक्नोति); इदम् अग्रे, अपरस्मिन् पाठे परिशीलयाम | अधुना केवलं धात्वङ्गे गुणः कुत्र–कुत्र सम्भवति इति प्रश्नः |

२. सूत्रद्वयेन एव गुणः सिद्धः इति पूर्वमेव ज्ञातम् अस्माभिः— **सार्वधातुकार्धधातुकयोः**, **पुगन्तलघूपधस्य च** इति | अनुवृत्ति–सहितसूत्रे द्वयोः अपि 'सार्वधातुकार्धधातुकयोः' इति पदम् आगच्छति |

**सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रस्य तात्पर्यं— सार्वधातुकार्धधातुकयोः परयोः इगन्तस्य अङ्गस्य इकः गुणः स्यात् | **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्रस्य तात्पर्यं— सार्वधातुकार्धधातुकयोः परयोः पुगन्तस्य लघूपधस्य च अङ्गस्य इकः गुणः स्यात् |

तर्हि द्वयोः सूत्रयोः 'सार्वधातुकार्धधातुकयोः' इति पदं भवति | नाम अङ्गम् इगन्तं चेदपि, अङ्गस्य उपधायां ह्रस्व–इक्–वर्णः चेदपि गुणः तदा सम्भवति यदा सार्वधातुकप्रत्ययः वा आर्धधातुकप्रत्ययः वा परे अस्ति | अतः सार्वधातुकसंज्ञा आर्धधातुकसंज्ञा इति संज्ञाद्वयं सम्यक्तया अवगन्तव्यम् | इदं संज्ञाद्वयं सम्प्रति पश्याम |

३. सार्वधातुकसंज्ञा का इति पूर्वमेव दृष्टम् | **तिङ्शित् सार्वधातुकम्** (३.४.११३) इति सूत्रेण यः प्रत्ययः तिङ् वा शित् वा अस्ति, तस्य प्रत्ययस्य सार्वधातुकसंज्ञा भवति | भवति–भवतः–भवन्ति इत्यादिषु रूपेषु –ति, –तः, –अन्ति इति तिङ्–प्रत्ययाः | यस्मिन् प्रत्यये शकारः इत्–संज्ञकवर्णः अस्ति, सः शित् |

आर्धधातुकसंज्ञा का इति एतावता न उक्तम् | वस्तुतः अतिसरलम् अस्ति— सूत्रं **आर्धधातुकं शेषः**(३.४.११४) | धातुभ्यः ये प्रत्ययाः विहिताः, तेषां सर्वेषां प्रत्ययानां सार्वधातुकसंज्ञा अथवा आर्धधातुकसंज्ञा भवति | अतः ये ये प्रत्ययाः धातोः परे सन्ति, ते सार्वधातुकसंज्ञकाः न सन्ति चेत्, अवश्यम् आर्धधातुकसंज्ञकाः सन्ति एव | **आर्धधातुकं शेषः**(३.४.११४) इति सूत्रेण अयमेव सन्देशः — धातोः अनन्तरं यः प्रत्ययः सः सार्वधातुकः नास्ति चेत्, आर्धधातुकः अस्ति एव |

४. विकरणप्रत्ययाः धातोः परे सन्ति, अतः सर्वे विकरणप्रत्ययाः सार्वधातुकसंज्ञकाः अथवा आर्धधातुकसंज्ञकाः |

धातुगणम् अनुसृत्य विकरणप्रत्ययाः—

१. भ्वादिगणे शप्<br>
२. अदादिगणे नास्ति (शपः लुक्, नाम लोपः)<br>
३. जुहोत्यादिगणे नास्ति (शपः श्लु, नाम लोपः)<br>
४. दिवादिगणे श्यन्<br>
५. स्वादिगणे श्नु<br>
६. तुदादिगणे श<br>
७. रुधादिगणे श्नम्<br>
८. तनादिगणे उ<br>
९. क्र्यादिगणे श्ना<br>
१०. चुरादिगणे शप्

अधुना, प्रत्येकं विकरणप्रत्ययः कीदृशः इति परिशीलयाम |

– यत्र यत्र प्रत्यये इत्–संज्ञकः शकारः वर्तते, तत्र तत्र सार्वधातुकसंज्ञा भवति | किमर्थम् इति चेत्, **तिङ्शित् सार्वधातुकम्** (३.४.११३)

इति सूत्रेण यः प्रत्ययः शित्, तस्य सार्वधातुकसंज्ञा भवति ।
– यः विकरणप्रत्ययः सार्वधातुक–संज्ञकः नास्ति, सः आर्धधातुक–संज्ञकः अस्ति एव ।

अग्रे पठनात् पूर्वं, एकैकस्य विकरणप्रत्ययस्य स्वभावः कः इति उच्चार्यताम् । (सार्वधातुक–संज्ञकः वा आर्धधातुक–संज्ञकः वा इति)

५. उत्तरम्
सार्वधातुक–संज्ञक–विकरणप्रत्ययाः = शप्, श्यन्, श्नु, श, श्नम्, श्ना
आर्धधातुक–संज्ञक–विकरणप्रत्ययाः = उ

६. शित्त्वात् सार्वधातुकसंज्ञकः प्रत्ययः अस्ति चेत्, **सार्वधातुकार्धधातुकयोः**, **पुगन्तलघूपधस्य च** इति सूत्राभ्यां गुणकार्यस्य प्रसक्तिः अस्ति इति ज्ञातम् । किन्तु गतपाठे अस्माभिः दृष्टं यत् **सार्वधातुकमपित्** (१.२.४) इत्यनेन सूत्रेण यः प्रत्ययः अपित्, सः ङिद्वत् । तथा च **क्क्ङिति च** (१.१.५) इति गुण–बाधक–सूत्रेण यः ङित् (अथवा ङित् इव) अस्ति, तस्य गुणकार्यं बाधितम् । अतः येषु सार्वधातुकप्रत्ययेषु इत्–संज्ञक–पकारस्य अभावः, तैः प्रत्ययैः गुणकार्यस्य प्राप्तिः न भवति । श्यन्, श्नु, श, श्नम्, श्ना इति प्रत्ययाः शितः तु सन्ति अतः शित्त्वात् गुणकार्यस्य प्रसक्तिरस्ति, परन्तु पित्त्वस्य अभावात् न गुणः । तर्हि दिवादिगणे, स्वादिगणे, तुदादिगणे, रुधादिगणे, क्र्यादिगणे च गुणकार्यस्य प्रसक्तिः आसीत्, किन्तु अपित्त्वात् बाधितम् ।

सारांशः एवम्— सार्वधातुकसंज्ञक-विकरणप्रत्ययं निमित्तीकृत्य, भ्वादिगणे चुरादिगणे चैव गुणकार्यं सम्भवति ।

आर्धधातुक–विकरणप्रत्ययाः के ? केवलम् उ । स च कस्य गणस्य विकरणप्रत्ययः ? तनादिगणस्य । **सार्वधातुकार्धधातुकयोः** इत्यनेन सूत्रेण यत्र आर्धधातुकप्रत्ययः अस्ति, तत्र गुणः विहितः । अत्रापि **क्क्ङिति च** (१.१.५) इत्यनेन गित्त्वात्, कित्त्वात्, ङित्त्वात् च गुणकार्यं बाध्यते; अतः गित्, कित्, ङित् च नास्ति चेत् बाधा नास्ति । आर्धधातुकप्रत्ययस्य प्रसङ्गे **सार्वधातुकमपित्** (१.२.४) इति सूत्रस्य प्रसङ्गः नास्त्येव, अतः अपित्त्वात् न बाधा । तनादिगणे उ इति विकरणप्रत्ययः; गित्, कित्, ङित् च नास्ति अतः अत्रापि गुणः अर्हः ।
यथा— कृ + उ → **कृ̭** + उ → करु → करु + ति → करोति ।

७. तर्हि भ्वादौ, तनादौ, चुरादौ च धात्वङ्गे गुणः अर्हः । दिवादिगणे, स्वादिगणे, तुदादिगणे, रुधादिगणे, क्र्यादिगणे च धात्वङ्गे गुणकार्यस्य प्रसक्तिः आसीत्, किन्तु अपित्त्वात् बाधितम् ।

अधुना अदादिगणे जुहोत्यादिगणे च ? तयोः का गतिः ? तयोः विकरणप्रत्ययः नास्ति । अत्र **अङ्गं** नाम किमिति स्मर्यताम् ।
अङ्गसिद्धान्तम् अनुसृत्य प्रत्ययात् प्राक् यावत् अस्ति, तत् सर्वम् अङ्गम् इति उच्यते । अङ्गं नाम प्रत्ययस्य कार्यक्षेत्रम् ।
१, ४, ५, ६, ७, ८, ९, १० इत्येषु गणेषु तिङ्–प्रत्ययान् निमित्तीकृत्य अङ्गम् (कार्यक्षेत्रम्) अस्ति धातुः + विकरणप्रत्ययः (चुरादिगणे धातुः + णिच् + विकरणप्रत्ययः) । किन्तु अदादिगणे जुहोत्यादिगणे च गणयोः तिङ्–प्रत्ययानाम् अङ्गम् (कार्यक्षेत्रम्) अस्ति धातुः एव ।

भवति–भवतः–भवन्ति इत्येषु रूपेषु –ति, –तः, –अन्ति इति तिङ्प्रत्ययाः इत्युक्तम् । तेषां प्रत्ययानां मूलरूपाणि एवम्— तिप्, तस्, झि । तिप् इत्यस्मिन् पकारस्य इत्–संज्ञां कृत्वा लोपं कृत्वा 'ति' इति शेषः । तथा अन्येषामपि तिङ्–प्रत्ययानाम् अनुबन्ध–लोपानन्तरं सिद्ध–रूपाणि सन्ति ।

एवं च मूल–परस्मैपदिधातूनां तिङ् प्रत्ययाः—

| | ए.व. | द.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | तिप् | तस् | झि |
| म.पु. | सिप् | थस् | थ |
| उ.पु. | मिप् | वस् | मस् |

एते सर्वे तिङः, अतः **तिङ्शित् सार्वधातुकम्** (३.४.११३) इत्यनेन सूत्रेण सार्वधातुकसंज्ञकाः । एकवचने तिप्, सिप्, मिप् इत्येते प्रत्ययाः पितः, अतः तत्र गुणः विहितः । द्विवचने बहुवचने च तिङ्प्रत्ययः सर्वत्र अपित् इति कारणतः **सार्वधातुकमपित्**, **क्क्ङिति च** इत्याभ्यां सूत्राभ्याम् अङ्गे गुणः नार्हः ।

यथा— अदादिगणे इ–धातुः गतौ, इ + तिप्, **सार्वधातुकार्धधातुकयोः** इत्यनेन सूत्रेण इगन्ताङ्गस्य इकः गुणः, एति इति रूपं सिद्धम् ।

किन्तु द्विवचने तस् इति तिङ्–प्रत्ययः अपित् अतः गुण–निषेधः, इ + तः → इतः इति रूपम् ।

विस्तरेण प्रदर्श्यते चेत्—

इ + तस् → सकारस्य रुत्वविसर्गौ 'तः' इति सिद्धप्रत्ययः → इ + तः → तः इति तिङ्–प्रत्ययः सार्वधातुकसंज्ञकः अतः **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रेण गुणस्य प्रसक्तिः → तः–प्रत्ययस्य अपित्त्वात् **सार्वधातुकमपित्** (१.२.४) इत्यनेन तः ङिद्वत्; **क्क्ङिति च** (१.१.५) इत्यनेन ङिद्वत्त्वात् गुणनिषेधः → इ + तः → इतः इति रूपं निष्पन्नम् ।

तथैव अदादिगणे रुद्–धातुः, रुद् + तिप्, **पुगन्तलघूपधस्य च** इत्यनेन सूत्रेण एकवचने उपधायाम् इकः गुणः, रोदिति इति सिद्धम् । किन्तु द्विवचने तस् इति तिङ्–प्रत्ययः अपित् अतः गुण–निषेधः, रुद् + तः → रुदितः इति रूपम् । जुहोत्यादिगणे अपि तथा— हु–धातोः द्वित्वं कृत्वा जुहु इति अङ्गं; जुहु + ति → गुणकार्यं → जुहोति इति रूपं निष्पन्नम् । परन्तु द्विवचने जुहु + तस् → जुहुतः; अपित्त्वात् गुणाभावः ।

८. सारांशः कः इति चेत्, १, २, ३, ८, १० इत्येषु गणेषु धात्वङ्गे गुणः सम्भवः; ४, ५, ६, ७, ९ इत्येषु गणेषु धात्वङ्गे गुणः नार्हः ।

<u>धात्वङ्गे गुणः सम्भवः</u>
भ्वादिगणः
अदादिगणः
जुहोत्यादिगणः
तनादिगणः
चुरादिगणः

<u>धात्वङ्गे गुणः असम्भवः</u>
दिवादिगणः
स्वादिगणः
तुदादिगणः
रुधादिगणः
क्र्यादिगणः

९. अभ्यासः । एषां धातूनां लट्–लकारस्य प्रथमपुरुषैकवचनान्तं रूपं निर्मातु । गुणकार्यं भवति चेत्, केन सूत्रेण; सन्धिकार्यं भवति चेत्, केन सूत्रेण इति वक्तव्यम् ।

<u>भ्वादौ</u> ध्रु, नख्, चुप्, क्षि, पिठ्, कुच्, श्रि, गै, तृ
<u>अदादौ</u> वी, इ
<u>जुहोत्यादौ</u> भृ → बिभृ → बिभर्ति, ह्री → जिह्री → जिह्रेति, भी → बिभी → बिभेति
<u>दिवादौ</u> तप्, लुभ्, दस्, स्विद्, खिद्
<u>तुदादौ</u> क्षिप्, कृष्, गुज्, मिल्, सृज्, स्पृश्, इल्
<u>चुरादौ</u> मुच्, तिज्, वर्ध्

इति गुणस्य परिचयः । अग्रे सार्वधातुकप्रकरणम् इत्यस्मिन् पाठे, इतोऽपि विस्तरेण वक्ष्यते ।

Swarup — August 2012 (updated December 2015)